नस्य चउद्दिशिं तिवनखंडाः समाज्ञता चउद्दिक्कस्मिन् चउद्दिशि वनखंड दिक्षु पंचपंचयोजनशतानि अबाधया इति बाधनं बाधा आक्रमणमित्यर्थः
न बाधा अबाधा अनाक्रमणं तया अबाधया अन्तरे कृत्वेति गम्यते अपान्तराले मुक्त्वेति भावः चत्वारो वनखंडाः प्रज्ञप्ताः अनेकजातीया नानाविधास्तु ममानो महीरुहाणां
समूहो वनखंडः उक्तं च जीवाभिगमचूर्णौ अणेगजाईयं उत्तमे रुक्खसंडे वणसंडे इति तद्यथेत्यादिना नामतन्ववनखंडान्नामतो दिशश्चदर्शयति

राजप्रश्नि अशोकवरपादपप्रधानं वनमशोकवनमेवं सप्तपर्णवनं चंपकवनं चूतवनमपि भावनीयं। उत्तिमराणमिच्चाइ चिथिपावमिदं अत्र संग्रहणिगाथा पुव्वेणं असो
गवणं दाहिणतो सत्तिवन्नवणं अवरेणं चंपगवणं उत्तरेणं चूयवणं आरामा इति ते णं मित्यादि ते वनखंडाः सातिरेकाणि अर्द्धत्रयोदशानि योजन
शतसहस्राणि आयामेन पंच योजनशतानि विष्कंभेन प्रत्येकं प्राकारपरिक्षिप्ताः ते वनखंडाः कथंभूताः इत्याह किण्हा किण्होभासा जा
व पडिरूवा इति यावत्करणादेवं परिपूर्णः पाठः किण्हा किण्होभासा नीला नीलोभासा हरिया हरियोभासा सीया सीओभासा निद्धा निद्धोभासा तिव्वा ति
व्वोभासा किण्हा किण्हच्छाया नीला नीलच्छाया हरिया हरियच्छाया सीया सीयच्छाया निद्धा निद्धच्छाया घणकडियकडिच्छाया रम्मा महामेहनिकुरुंबभूया
ते णं पायवा मूलमंतो कंदमंतो खंधमंतो तयामंतो पवालमंतो पत्तमंतो पु प्फमंतो बीयमंतो फलमंतो अणुपुव्वसुजायरुइलवट्टपरिणया एग
खंधी अणेगसाहप्पसाहविडिमा अणेगनरवामसुप्पसारियअग्गे ज्झघणविउलवट्टखंधी अच्छिद्दपत्ता अविरलपत्ता अवाईणपत्ता
अणीइपत्ता निद्धूयजरढपंडुपत्ता नवहरियभिसंतपत्तभारंधया रगंभीरदरिसणिज्जा उवनिग्गयवरतरुणपत्तपल्लवकोमलउ
ज्जलवलंतकिसलयसुकुमालपवालपल्लवंकुरग्गसिहरा निच्चं कुसुमिया निच्चं मउलिया निच्चं थवइया निच्चं गोच्छिया निच्चं जमलिया निच्चं जुय
लिया निच्चं विणमिया निच्चं पणमिया निच्चं कुसुमियमउलियलवइयथ वइयगुलइयगोच्छियजमलियजुयलियविणमियपणमियसुविभत्त
पडिमंजरिवडेंसयधरा सुयबरहिणमयणसलागकोइलकोरकभिंगारककोंडलजीवंजीवकनंदीमुहकविलपिंगलक्खगकारंडवचक्कवागक
लहंससारसअणेगसउणगणमिहुणविरइयसद्दुन्नइयमहुरसरनाइया संपिंडियदरियभमरमहुयरिपहकरपरिलिंतमत्तछप्पयकुसुमासवलोलमहु
रगुमगुमंतगुंजंतदेसभागा अब्भिंतरपुप्फफला बाहिरपत्तोच्छन्ना पत्तेहि य पुप्फेहि य उच्छन्नपलिच्छन्ना नीरोगका साउफला अकंटगा नाणाविहगुच्छगुम्म
मंडवगसोहिया विचित्तसुहकेउबहुला वाविपुक्खरिणीदीहियासुयनिवेसियरम्मजालघरगा पिंडिमनीहारिमसुगंधिसुहसुरभिमणहरं च गंधद्धणिं
मुयंता सुहसेउकेउबहुला अणेगरहजाणजुग्गसिबियपविमोयणा सुरम्मा पासाईया इति व्याख्या इह प्रायो विशेषणानां मध्ये वयमिव ४०

र्णितानि पत्राणि कृष्णानि भवंति ततस्तद्योगाद्वनखंडा अपि कृष्णाः न चोपचारमात्रेण कृष्णा इति व्यपदिश्यंते किंतु तथा प्रतिभासनात् तथाहि कृष्णा श्री
वस्थायां यावति भागे कृष्णानि पत्राणि संति तावति भागे वनखंडाः कृष्णा अवभासंते ततः कृष्णो अवभासो येषां ते कृष्णावभासा इति तथा हरितत्वमतिक्रां
तानि किसलयत्वमसंप्राप्तानि पत्राणि नीलानि ततस्तद्योगाद्वनखंडा अपि नीलाः न चैतदुपचारमात्रेणोच्यते किंतु तथावभासमानत्वात् तथाह नीलावभासाः समासः
प्राग्वत् तथा यौवनावस्थानि पत्राणि किसलयत्वं रक्तत्वं चातिक्रांतानि ईषद्धरितालाभानि पांडूनि संति हरितानीति व्यपदिश्यंते ततस्तद्योगाद्वनखंडा अपि ह
रिताः न चैतदुपचारमात्रेण उच्यते किंतु तथा प्रतिभासनात् तथा चाह हरितावभासाः तथा बाल्यादतिक्रांतानि पत्राणि शीतलानि भवंति ततस्तद्योगा
द्वनखंडा अपि शीता न चैतदुपचारमात्रेण व्यपदिश्यते किंतु तथा प्रतिभासनात् तथा चाह शीतावभासा अधोभागवर्त्तिनां विमानिकदेवानां देवीनां च तद्योगाच्छीतवात
मस्पर्शितत्वात् शीता वनखंडा अवभासंते इति तथा एते कृष्णनीलहरित वर्णाः यथास्वस्वरूपे अत्यर्थं स्फुटाः स्निग्धा इत्युच्यंते तीव्राश्च ततस्तद्योगा
द्वनखंडा अपि स्निग्धास्तीव्राश्च इत्युक्तं न चैतदुपचारमात्रेण किंतु तथावभासनात् तथा चाह स्निग्धावभासास्तीव्रावभासा इति इहाव
भासो भ्रांतोऽपि भवति यथा मरुमरीचिकासु जलावभासस्ततो नावभास मात्रोपदर्शनेन यथावस्थितं वस्तुस्वरूपमुपवर्णितं भवति किंतु तथा
स्वरूपप्रतिपादनेन ततः कृष्णादीनां यथास्वरूपप्रतिपादनार्थमेवाह पुनरप्युत्तरं विशेषणकदंबकमाह किण्हा किण्हच्छाया इत्यादि कृष्णा वनखंडाः
कुत इत्याह कृष्णच्छायानिमित्तकारणे हेतौ प्रथमा सर्वेषां विलक्षणो नो ज्ञायो दर्शनमिति ख्यापनार्थं हेतौ प्रथमा ततोऽयमर्थः यस्मात्कृष्णा छाया आकारः सर्वा
विसंवादित्वात् तेषां तस्मात् कृष्णाः एतदुक्तं भवति सर्वेऽपि सर्वादितया तत् कृष्ण आकार उपलभ्यते न च भ्रांततावसायः संपादितमत्त्यालकः सर्वाविसंवादित्व
तेन तस्मात् सत्यतः कृष्णा न भ्रांततावभासमात्रेणेव व्यवस्थापिता इति एवं नीला नीलच्छाया इत्यादि अपि भावनीयं नवरं शीता शीतच्छाया इत्यत्र छाया आतप इति
प्रकृतवस्तुवाचक इत्यादि घणकडियकडच्छाया इति अन्योऽन्यशाखाप्रशाखानुप्रवेशतः कटितमिव कटितं घटना अन्योन्य
आश्लेषः शाखाप्रशाखानां तेन कडितात् मध्ये नागवायायपाततथा मध्यभागे निविडतरछायाः इत्यर्थः अत एव रम्या रमणीयाः तथा महामेघनिकुरंबव

नतथाइह कालनावीयामघनिकरस्तोमघमहदसंहताखाणे।शाखामदामेघनिकरस्छइतामदामघर्थदापमाइत्यर्थः।तणपायवाइत्यादि।अशोकवर
पादपपरिवारत्वेनशाखकतिलकादिद्रुमवर्गकैवनूपरिभावनीय।नवरंस्तयवरदिणमयणसलागाइत्यादिविशेषणमात्रोपमयाभावनीयं।आणगमग
उरसझाणेत्यादितदाकारभावतः।तसिणवणसंडाणमित्यादि।तेषांवनखंडानामंतर्मध्येबहुसमरमणीयाइभूमिभागाः।तत्रयावत्तेषांबहुसमिनाभागानांम
ज.शानामणस्तालिगवरकरइत्वाइत्यादिवर्णनंशाखकेतावद्वाच्यं।यावन्मणीनांस्पर्शोनवरमत्रतृणानामपिवक्तव्यानिविवंनाणाविहपंचवण्णेहिंमणीहिंयतणे
हिंयउवसोभियातंजहा।किण्हेहिंयनीलेहिंयजावसुक्किलेहिंतत्थणंजेकिण्हातणायमणीयतेसिणमयमेयारूवेवण्णावासपन्नत्ते।सेजहानामएजाइ
नेवाइत्यादिसंशतितेषामणीनांतृणानांचवातेरितानांशब्दस्वरूपप्रतिपा दनार्थमाहातसिणंतेतितणाणमणीणयइत्यादितेषांणमितिपूर्ववत्।न
दंनपरमकल्याणानियागित्तृणानांचपूर्वपरदक्षिणोत्तरागतैर्वातै। मंदायंतिमंदंमंदमजिताणांकंपितानां।व्यजितानांविशे षतःकंपिता
नांपुनःतदवपर्यायेणाइनव्यावाइ।कंपितानांतथाचालितानामित स्ततोमनाकविक्षिप्तानांमितादवपर्यायेणव्यावाइ।स्पंदितानां।
तथाः।घट्टितानांपरस्परंघषेणकानांतथाघट्टिताइत्यादि।क्षोभितानां स्वस्थानाच्चालनमपिकृतइत्यादि।उदीरितानांप्राबल्येनाप्रेरितानां
कोदृशाःशब्दाः।उच्चाःनगवानादणायमेत्यादि।गोतमसयथानामकःसि विकायावास्यदमानिकायावारथस्यवांतत्रसिविकाजंपानविशेषस्या
उपरिवादिताकाशाकारनंवादायांजंपानविशेषः।थरूमसमस्थमाणावकाशर्थःसंमिदमानिकाअभ्यंपाश्वाशशःधरूमाणत्यादितायाःकुड्डेदेमघंटिका
द्विवलनवशानांघटितयोरथाग्रहस्तंसंयोगरथःप्रत्ययोश्वतनविशेषणानामन्त्यशासनेवानंतसम्बंफलकावेदिकायस्मिन्कालायवमहासम्पेक्षा
याकतिशमाणावमयातस्मपरस्थस्यविशेषणानमलिखित।सतनासमत्यादिसम्बन्धस्यसथनामसघाक्रमंप्रजनयपार्श्ववर्तिभिमदाश्रमाणपंटोपनसममप
नाकसमतलातोरणावरंश्चनतोरणायसमप्राताणवरसममद नदिगाघोषादशाइर्यनिनादायसमनंदिघोषसमस्तथामदक्षिकिमजक्षेइंदयपण
सितिसकिंकिणीकानिदमजालानियाहिसमघदामसहर्द्वस्त्रि।सर्वतोदिक्षुपर्यातशरदिः।प्रदेशेषापरिक्षिप्तामासंसमसंतवादमर्वतंहिमर्वर्तनावि

॥श्री॥

विशेषविरमणेशदाविशेषो।पेतेतिनजातिनशततममेवधिकनकमिर्दकनकविद्धुरितंदारुकाष्ठंयस्यसदिमवलयितिनजाकनकनिर्द्धकदारुकं।सम्प
स्तवर्द्धितायःककारःस्वार्थिकरूर्वस्पवदीर्घवंशकृतश्वानंतगाभइहुअतिशायनसमस्यकुपितदेवदमरकमंडलसस्वयमप्तसंपितनिशरकमंडलघृक्कस
मतवाकालायसनलोहनैगुडुच्छतिशायनकृतानामिवायपरिधियंत्रस्यवारकाणपरिफलकस्यककवालकर्मायस्मिन्सकालायमकृतनेमितवक
र्मतिमतथाअकोसपिणोधमोर्यवरःअधानावतागासाहुइच्छतिशायनसमस्यकृप्रवृक्षरूपावितायस्मिन्समअकोसर्वरतागवमंवक्षः।तथ
शकृत्वावारवजशेनावपिक्षानसमपरनिपातः।तथामारविकर्माणिय्यक्षशलानासमियामस्संसअतिशायनहोकादकंकःसारविस्मितवश्वमा
सकृपरिशृष्टतिस्यतथासरसयवशसमलाणायमिंडियस्मशतिरागणो शानंशयकायवानिशारशानानिवानिद्याविंशाश्वणानितिमंडितः॥
शनवाविशत्तुणमंडितकिंविशकन्नुवसिःएवंनामतानिद्याविंशानहृतानि तृणानिरसस्यसर्वतःपर्यंतवलेविताथियप्रांतनिसमानमपयाकप
लितस्मतावमंडनायनवंतंविशाकंददवृश्चसदककदयसमम कंकटमकंकायःवतेसःवामायस्यसमकंकयवतेसःसम
तथामदक्षपायथामसवाणमसायायसरायानिवकनिविभवेदि प्रहृतानिनानाप्रकाराणिप्रहरणानियानिवक्कवतरोदकरथेषुना
निआवरणानितिद्वंतःपरिशर्मसमायाधानात्वद्वेतनिमित्तंसघःथआ। णेश्वातायःसायाधश्वमघमतःअर्यमयनसदविशेषणसमासः।त
सइतंवलम्पंजगणेअतःशरवरासवामणिकहिमतालमणिवइदमितालअनीहसमनीहसणिकहिमतलसदशाशगाणादिष्टतेनवा
अभिघडियमाणासमानिअतिप्रश्मान स्तावाणगच्छतायरदारामनाक्रकर्मसमानानिर्ईतिकराःसर्वतःसमंतातृतीवानिगमखलदाकायामपिवरा
छस्यामवक्षमितितपाउआवलयनअतितालमस्यनतालेवाउन्नलेस्मक्तसारणकाकस्यसंमाउनामिकमजनामंनामिकोदिविनिर्गमशाउगतिमित्तोनिवः
तवाअरुथ्याणावयमितिअर्यनिर्विणोकपानमरुथाणापरीतवाजवमीराणा।मर्मःकमलंकतंवाकमसविशउमंसुपंसमासलिततंवलितवातोक्षी।
उनेतंवकलकियंवकंतादवकअवस्त्रदेमजार्गसममलतियंअरुथ्याणादानितायस्मातंजयतृहरकलानिःप्रशिर्मगीयातनमर्मिगयरागाइकृनय

राजप्रश्नवृत्ति

तं×२

न्गीयते तत्र रक्तं। अन्योन्यस्वरविशेषकरणेन यद्दलं कृतमिव गीयते तद्दलं स्नतं उरस्वरस्फुटकरणतो व्यक्तं विस्वरकोशातीवविघुष्टं मधुरस्वरेण गीय
माने मधुरं कोकिलारुतवत् तलवंशस्वरादिसमनुगतं समं तथा यत् स्वरघोलनाप्रकारेण ललतीव सललितं नवलाननवर्णितं इति ललितं यद्वा यत्
श्रोत्रेन्द्रियस्य शब्दस्पर्शनमतीव सूक्ष्मत्वादयति सुकुमारमिव प्रतिभासते तत् सललितं इदानीमेतेषामष्टानां मध्ये क्रियते उणान् अन्त्य इति प्
रदक्षिणावर्तमादाय रत्नेति शब्दाणकरणेषु इत्तत्तकन्दरगुंजितं समतेतितलताललयग्रहसु संप्रयुक्तं मधुरं समं सललितं लेमणोहरं मउयरभियपयसंचारं सु
रइं सुनतिं वरचारुरूवं दिव्वं नट्टसज्जं गेयं पगीयाणमिति यथाशाकुनाद्यभिधे व्याख्याते तथा नाट्यविधौ सगरे एसएमाइ देवस्स गीतानां गाउमारद्धव
नोया हैशाः शाखानिमनादर्शनवतिस्यात् कथंविज्ञायते इदं प्रस्तेषां   नृणां नाममणीनां वनुभुः एवमुक्तनगवतादः॥ गोतमस्यादेवं नृतशाटः॥
तस्मिणं वणसंडाणमित्यादि तपाणामिति वाक्यालंकारे वनखंडा ·   नाम मध्ये तत्र तं शब्दो। तत्र तत्र तिन स्थवादशस्य तत्र तत्र एकदेशे ब
हूईइति बहूहिं खुड्डखुड्डियाउ इति क्षुल्लकाः क्षुल्लिकालघवालघव   इत्यर्थः। वाप्यश्चतुरस्राः उक्करिण्यो हन्नाकाराश्चवाउ क्कराणि
वितं नयाबुना: दीर्घिकाः ऋजुसारण्यः। वक्रानाद्यागुंजाले   कावक्रनि केवलाः केवलानि प्रवाकार्ष्यिका तिमरं सिएकपं
क्या व्यवस्थिता तिसर: पंक्तिस्ता बहूसरः पंक्तय: तथा एकसर: सुपंक्त्या   व्यवस्थिता तद्भुक्तपाटकं यथालिकाया संबधितिमसर: पंक्तिस्ता बहव:
सरःसरः पंक्तय: तथा बिलानी व बिलानि कूपास्तेषां पंक्त्या बिलपंक्तयः एता :सर्वा अपि कथंभूता इत्याह अच्छा: स्फटिकवद्बहिर्निर्मलप्रदेशाः अ
क्ष्णाः श्लक्ष्ण: उक्कलनिःप्यादित्वबहिःप्रदेशाः श्लक्ष्णदलनिष्पन्नपट्टवत्तथा रजतमयं रूप्यमयं कूलं यासां ता रजतमयकूला स्तथा समं नगर्तनिभावात्
विषमतीरं तीरवर्तिजला शरितं स्थानं यासां ता: समतीरा: तथा वज्रमया: पाषाणा यासां ता वज्रमयपाषाणा: तथा तपनीयं हेमविशेषस्तपनीयतप
नीयमयं तलं यासां तास्तपनीयतला: तथा सुवर्णसुभ्ररययवालुयाउ इति सुवर्णं पीतकांतिहेम ः सूप्यविशेषः रजतश्वेतातेन यावालुका यासु ता
:सुवर्णरूप्यरजतवालुका:। वेरुलियमणिफलिहपडलपच्चोयडाउ इति वैडूर्यमणिमयानि स्फटिकपटलमयानि प्रत्यवतटानि तट:समीपवर्त्ती। ४२

ना अ न्नततप्रदेशा यासां ता वैडूर्यमणि स्फटिकपटलप्रत्यवतटा:। सुउयारसुउत्तारा उ इति सुखेनावतारो जलमध्ये प्रवेशो यासु ता: सुखावतारो तात
था सुखेनोत्तारो जलमध्याद्बहिर्विनिर्गमनं यासु ता: सुखावतारास्तत: पूर्वपादेन विशेषणसमास:। नानामणितित्थसुबद्धाउ इति नानामणिभिर्नानाप्र
कारैर्मणिभिस्तीर्थानि सुबद्धानि यासां ता नानामणिनाबसुबद्धा अत्र बहुव्रीहौ विकितस्य परनिपात: सुखादिदर्शनात् प्राकृतशैलीवशाद्वा। चउक्के
णाउ इति चत्वार: कोणा यासां ताश्चतु: कोणा एतच्च विशेषणं वापी कूपाश्च प्रति द्रष्टव्यं तेषामेव चतुष्कोणत्वसंभवात् नास्मिषाणां तथा अनुपूर्वेण
क्रमेण नातिसंरोतावरूपेण सुहु अतिशायनया जातवप्र: केदारो जलस्थानं तत्र गंभीरमलं स्थानं शीतलं जलं यासु ता अणुपुव्विसुजातवप्पगं
भीरशीतलजला: संछन्नपत्तभिसमुणाला उ इति संछन्नानि जलेनात   रितानि पत्रविसमृणालानि यासु ता: संछन्नपत्रविसमृणाला इह विसमृ
णालसाहचर्यात् पत्राणि पद्मिनीपत्राणि इष्टव्यानि बिसानि कंदा   मृणालानि पद्मनाला: तथा बहूनि उत्पलकुमुदनलिनसुभगसोगं ×नलि×८
धिकपुंडरीकसेतपत्रसहस्रपत्रै: केसरै: केसरप्रधानै:   फुल्लैर्विकसितैरुपचिता बहूत्पलकुमुदनलिनसुभगसोगं
धिकपुंडरीकशतपत्रसहस्रपत्रकेसरफुल्लोपचिता: तथा षट्पदै   र्भ्रमरै: परिभुज्यमानानि कमलानि उपलक्षणमेतत् कुमुदादी
नि यासु ता: षट्पदपरिभुज्यमानकमला: तथा अच्छेन स्वरूपत: स्फटि   कवत् शुद्धेन विमलेनागंतुकमलरहितेन सलिलेन पूर्णा: अच्छविम
लसलिलपूर्णा: तथा पडिहत्था अतिरिक्ता अतिप्रभूता इत्यर्थ: पडिहत्थभमंतमच्छकच्छभा अणेगसउणमिहुणपविचरिताउ इति वचनादुदाहरणं वा प्रत्येण
पडिहत्थ गयणं मरालनवसलिल उच्छमाया इत्यादि इयं मत्स्यणवितापमणं उदविरादइ तित्रमातामत्स्यकच्छपायत्र ता: पडिहत्थभमंतमच्छकच्छपा अ
नेकेशकुनिमिथुनकै: प्रविचरिता इतस्ततो गमनमर्वस्ता व्याप्ता: अनेकशकुनिमिथुनकप्रविचरिता स्तत: पूर्वपादेन विशेषणसमास: एता
वाप्यादय: सरस्सर: पंक्तिपर्यंता: प्रत्येकं प्रत्येकं प्रतिप्रत्येकं पद्मवरवेदिकया परिक्षिप्ता: प्रत्येकं प्रत्येकं च वनखंडपरिक्षिप्ता: तासां च वाप्यादीनां पद्मवरवेदिकावनखंडवर्णनं प्रागुक्तमिति
" ।पद्मवरवेदिकया परिक्षिप्ता: प्रत्येकं प्रत्येकं वनखंडपरिक्षिप्ता:। अप्पेगइयाउ इत्यादि अपि: संभावनायां एके का: काश्चन वाप्यादय आस

×केसरप्रधानै: फुल्लैर्विकसितैरुपचिता बहूत्पलकुमुदनलिनसुभगसोगंधिकपुंडरीकशतपत्रसहस्रपत्रकेसर १×

व मिव वंऽस्तासादिपरमासवमिवउदकं यासां तां आसवोदकाः। अप्येकका वारुणस्य वारुणसमुद्रस्येवउदकं यासां ता वारुणोदकाः। अप्येककाः क्षीर
मिवउदकं यासां ताः क्षीरोदकाः। अप्येकका घृतमिवउदकं यासां ता घृतोदकाः। अप्येकका क्षोदरसइक्षुरसइवउदकं यासां ताः क्षोदोदकाः। अप्येकका
:स्वाभाविकेन उदकरसेन प्रज्ञप्ताः। पासाईयाओ इत्यादि विशेषणचतुष्टयं प्राग्वत्। तासिणमित्यादि। तासां क्षुल्लिकानां वापीनां यावद्बिलपंक्तीनामिति यावत् प्र
त्येकं चउक्कारिणादिपरिपाटः। प्रत्येकं चतुर्दिशि चत्वारि एकैकस्यां दिशि एकैकस्य भावात् त्रिसोपानप्रतिरूपकाणि विशिष्टरूपाणि त्रिसोपानानि त्र्याणां
सोपानानां समाहारस्त्रिसोपानं तानि प्रज्ञप्तानि। तेषां च त्रिसोपानप्रतिरूपकाणामयमेवंरूपो वक्ष्यमाणः प्रत्यक्षोपानंतरं वक्ष्यमाणस्वरूपो वर्णावासो वर्णकनि
वेशः प्रज्ञप्तस्तद्यथा वज्रमया नेमा इत्यादि प्राग्वत्। तासिणमित्यादि। तेषां त्रिसोपानप्रतिरूपकाणां प्रत्येकं तोरणानि प्रज्ञप्तानि। तोरणवर्ण
कस्तु निरवशेषो यानविमानवद्भावनीयो यावद्बहवे सहस्सपत्तहत्थ का इति। तासिणमित्यादि। तासां क्षुल्लिकानां क्षुल्लिकानां यावद्बिल
पंक्तीनामपान्तरालेषु तत्र तत्र देश स्मिंस्तस्मिन् देशे तस्य तस्य एकदेशे बहव उत्पातपर्वता यत्रागत्य बहवः
सूर्याभविमानवासिनो वैमानिका देवा देव्यश्च विचित्रक्रीडानिमि त्तं वैक्रियशरीरमारचयंति। णियइपव्वया इति नियता नियतेन
व्यवस्थिताः पर्वता नियतपर्वताः क्वचित् णिययपव्वया इति पाठः। तत्र नियताः सद लोकस्थायिनोऽवस्थिताः पर्वता नियतपर्वता यत्र सूर्याभविमानवासिनो वै
मानिका देवा देव्यश्च भवधारणीयेन वैक्रियशरीरेण प्रायः सदा रममाणा अवतिष्ठंत इति भावः। जगईपव्वया इति जगतीप र्वतकाः पर्वतक
विशेषाः दारुपर्वतकाः दारुनिर्मापिता इव पर्वतकाः दगमंडवा इति दकमंडपाः स्फाटिकमंडपाः उक्तं च जीवाभिगममूलटीकायां दकमंडपाः स्फाटिकमंड
पा इति एवं दकमंचकाः दकमालकाः दकप्रासादाः। उन्नतवदकमंडपादयः। क्वचित् उसडा इति उच्छ्रायवन्तोऽल्पप्रदेशाः क्वचित् खुड्डाखुड्डे इति क्षुल्लकाः क्षुल्ल
का इति तथा आंदोलकाः। पक्खंदोलकाः। यत्र मनुष्या आगत्य आत्मानमांदोलयंति ते आंदोलका इति लोकप्रसिद्धाः यत्र पक्षिण आगत्य आत्मानमांदोलयं ४३
ति ते पक्ष्यांदोलकाः सव्वरयणामया अच्छा इत्यादि विशेषणकदंबकं प्राग्वत्। तेसु णमित्यादि। तेषु उत्पातपर्वतेषु यावत्पक्ष्यांदोलकेषु सर्वरत्नमया सर्वा

×र्वं×४

रयणामया अच्छा सण्हा इत्यादि विशेषणकदंबकं प्राग्वत्। तेसिणमित्यादि। तेषु उत्पातपर्वतेषु यावत्पक्ष्यांदोलकेषु सव्वरयणामयाणि तत्पर्वतका
दिपरिपाटः। हंसासणाइं हंसासनादीनि आसनानि तत्र येषामासनानामधोभागे हंसा व्यवस्थितास्तानि हंसासनानि एवं क्रौंचासनानि गरुडासनानि भावनीयानि
उन्नतासनानि नाम उच्चासनानि। प्रणतासनानि निम्नासनानि। दीर्घासनानि शय्यारूपाणि। भद्रासनानि येषामधोभागे पीठिकाबंधः। पक्ष्यासनानि
येषामधोभागे नानास्वरूपाः पक्षिणः। मकरासनानि सिंहासनानि भावनीयानि। पद्मासनानि पद्माकाराणि आसनानि। दिसासोवत्थियासणाणि
येषामधोभागे नानादिक्सौवस्तिका आलिखिताः। सम्प्रति अत्र यथाक्रममासनानां संग्रहणिगाथा। हंस कोंच गरुड उण्णय पणय दीह भद्द पक्खे मयरे।
पउम सीह दिसासोवत्थि बारसमे। इति तानि सर्वाण्यपि कथंभूतानीत्यत आह सव्वरयणामया इत्यादि प्राग्वत्। तेसिणमित्यादि। तेषां वनखंडानां मध्ये
तत्र तत्र देशे तस्मिंस्तस्मिन् तस्य एकदेशे बहूनि आलिघर काणि आलिर्वनस्पतिविशेषस्तन्मयानि गृहकाणि आलिगृहकाणि
आलिगृहकाणि मालिरपि वनस्पतिविशेषस्तन्मयानि गृहक ाणि मालिगृहकाणि कदलीगृहकाणि लतागृहकाणि अवस्थाना
निस्थानगृहकाणि इति आस्थानगृहकाणि यत्रागत्य दावास्था गत्य सुखासिकया अवतिष्ठंते पेच्छणघरगा प्रेक्षणकगृहकाणि यत्रागत्य प्रेक्षण
कानि विदधति निरीक्षंते वा। मज्जणघरगा मज्जनकगृहकाणि यत्रागत्य स्वेच्छया म ज्जनकं कुर्वंति। पसाहणघरगा प्रसाधनगृहकाणि यत्रागत्य स्वपरं च मंडयंति। गब्भघरका
णि गर्भगृहकाकाराणि मोहणघरगाइ इति मोहनं मैथुनं रमियं मोहणं रयं इति नाममालावचनात् तत्प्रधानानि गृहकाणि मोहनगृहकाणि
वासभवनानीति भावः। सालाघरकाणि पट्टशालाप्रधानानि गृहकाणि जालघरकाणि गवाक्षयुक्तानि गृहकाणि। कुसुमघरकाणि कुसुमप्रकरोपचितानि गृहका
णि चित्रगृहकाणि चित्रप्रधानानि गृहकाणि गंधर्वगृहकाणि गीतनृत्ययोग्यानि गृहकाणि आदर्शगृहकाणि आदर्शमयानीव गृहकाणि। ते तानि
च कथंभूतानीत्यत आह सव्वरयणामया इत्यादि विशेषणकदंबकं प्राग्वत्। तेसिणमित्यादि। तेषु आलिगृहकेषु यावदादर्शगृहकेषु अत्र यावत्करणा
लिगृहकादिपरिग्रहः। बहूनि हंसासनानि इत्यादि प्राग्वत्। तेसिणमित्यादि। तेषां वनखंडानां तत्र तत्र तस्मिंस्तस्मिन् देशे बहवो जातिमंड

राजप्रवि

मंडपकः यूथिकामंडपकः मल्लिकामंडपको नवमालिकामंडपकः वासंतीमंडपकः दधिवासुका नाम वनस्पतिविशेषस्तन्मयो मंडपको दधिवासुका
मंडपकः सूरिल्लिर्वनस्पतिविशेषस्तन्मयो मंडपकः सूरिल्लिमंडपकः नागवल्ली नागवल्ली तन्मयो मंडपकः ताम्बूलीमंडपकः नागाख्यो वृक्षविशेषः
स एव लता नागलता इह यस्य तिर्यक् तथाविधा शाखाप्रशाखा वा न प्रसृता सा लतेत्यभिधीयते नागलतामयो मंडपको नागलतामंडपकः अति
मुक्तकमंडपकः अप्फोया इति वनस्पतिविशेषस्तन्मयो मंडपकः अप्फोयामंडपकः मालुका एकास्थिकफला वृक्षविशेषास्तन्मयो मंडपकः
मालुकामंडपकः एते च कथंभूता इत्याह सर्वरत्नमया इत्यादि प्राग्वत् तेसु णमित्यादि तेषु जातीमंडपकेषु यावद्दशार्द्धयूथिकामंडपिका
दिपरिग्रहः बहवः शिलापट्टकाः प्रज्ञप्ताः तद्यथा अप्येककादेः समनवत्संस्थिताः सामनसंस्थितायावदप्येककादिक्रौंचासनमनसं
स्थितायावत्करणात् अप्पेगइया उरकासणसंठिया अप्पेगइया गरुडासणसंठिया अप्पेगइयाउन्नयआसणसंठिया पणयासणसं
ठिया अप्पेगइया दीहासणसंठिया अप्पेगइया भद्दासणसंठिया अप्पेगइया सीहासणसंठिया अप्पेगइया पउमासणसं
ठिया इति परिग्रहः अन्ये च बहवः शिलापट्टका यानि वि शिष्टचिह्नानि विशिष्टनामानि वरशयनानि शयनानि आस
नानि तद्वत्संस्थिता वरशयनासनविशिष्टसंस्थानसंस्थिता क्वचित् समांसलघट्टविसिट्ठसंठाणसंठिया इति पाठस्तत्र बहवः शि
लापट्टकाः मांसलाः अकठिनाः इत्यर्थः सुघट्टा अतिशायनमसृणा इति भावः विशिष्टसंस्थानसंस्थिताः आईणगरूयबूरनवणीयतूलफासमउ
या सव्वरयणामया अच्छा जाव पडिरूवा इति प्राग्वत् तत्र तत्र उत्पातपर्वतादिगतेषु हंसासनादिषु यावन्नानारूपसंस्थानसंस्थितेषु पृथिवीशिलापट्टकेषु ण
मिति पूर्ववत् बहवः सूर्याभविमानवासिनो देवा देव्यश्च सुखमासते शेरते दीर्घकायप्रसारणेन वर्तन्ते न तु निद्रां कुर्वन्ति तेषां देवयोनिकत्वेन नि
द्राया अभावात् तिष्ठंति ऊर्ध्वस्थानेन वर्तंते निषीदन्ति उपविशंति त्वग्वर्तयंति वामपार्श्वतः परावृत्त्य दक्षिणपार्श्वेनावतिष्ठंते दक्षि
णपार्श्वतो वा परावृत्त्य वामपार्श्वेनावतिष्ठंते इति भावः रमंते रतिमाबध्नंति ललंति मनईप्सितं यथा भवति तथा वर्तन्ते इति भावः क्रीडंति यथासुखमितस्ततो

xसाध/

गमनविनोदेन गीतनृत्यादिविनोदेन वा तिष्ठंति मोहंति मैथुनसेवां कुर्वन्ति एवं पुराणाणमित्यादि पुराणं पूर्वभवे इति भावः सुचीर्णानां
णमिति वाक्यालंकारे पुराणानां सुचीर्णानां सुचरितानामिह सुचरितजनितं कर्मापि कार्ये कारणोपचारात् सुपराक्रांतजनितं तत्र सुचीर्णानां
विशिष्टतथाविधधर्मानुष्ठानविषयाप्रमादकरणक्षांत्यादिसुचरितजनितानामिति तथा सुपराक्रांतानामपि कार्ये कारणोपचारात् सुपराक्रां
तजनितानि सुपराक्रांतानि इहाक्रंकिसुक्रंतं वधिषकलसत्वमैत्रीसत्यभाषणपरद्रव्यानपहारसुशीलादिरूपं सुपराक्रमजनितानामिति अत
एव शुभानां शुभफलानां इह किंचिदशुभफलमपि इंद्रियमतिविपर्यासात् शुभफलं प्रतिभासते ततस्तात्त्विकशुभत्वप्रतिपत्त्यर्थमस्यैव पर्यायशब्द
माह कल्याणानां तत्त्वतोनार्थविशिष्टफलदायिनामत एव कल्याणानामनर्थोपशमकारिणां कल्याणरूपफलविपाकं प्रत्यनुभवमाणा
प्रत्यनुभवंतो विहरंत्यासते तासि णमित्यादि तेषां वनषंडानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं प्रासादावतंसकाः इति अवतंसक
इव प्रासादावतंसकः प्रासादावतंसकः प्रासादविशेष इति ना बहुमध्यदेशभागे प्रत्येकं प्रासादावतंसकाः प्रज्ञप्ताः ते च प्रासादावतंसकाः पंच
योजनशतानि ऊर्ध्वमुच्चत्वेन अड्ढाइज्जाइं जोयणसयाइं विक्खंभेणं अब्भुग्गयमूसियपहसियाविव इत्यादि विशेषणजातं प्राग्वत् तत्र सिंहासनं सपरिवारं
सिंहासनवर्णनं सपरिवारं प्राग्वत् तत्थ णमित्यादि तत्र तेषु वनखंडेषु प्रत्येकमेकैको देवो महर्द्धिको यावत्करणात्
महद्युतिको महाबलो महायशा महासौख्यो महानुभाव इति परिग्रहः पल्योपमस्थितिकाः परिवसंति तद्यथा अशोक इत्यादि अशोकवनेऽशोकः सप्तप
र्णवने सप्त ....पर्णः चंपकवने चंपकः चूतवने चूतः तेषां णमित्यादि तेषामशोकादीनां देवानां स्वकीयस्य वनखंडस्य स्वकीयस्य प्रा
सादावतंसकस्य स्वस्य स्वस्य सामानिकदेवानां स्वासां स्वासामग्रमहिषीणां स
परिवाराणां स्वासां पर्षदां स्वेषां स्वेषामनीकाधिपतीनां स्वेषां स्वेषामात्मरक्षाणां आहेवच्चं पोरेवच्चमित्यादि प्राग्वत् सूरियाभस्स णमित्यादि
सूर्याभस्य विमानस्यांतर्मध्ये बहुसमरमणीयो भूमिभागः प्रज्ञप्तः स यथानामको आलिंगपुष्करमिति वा इत्यादिना यानविमानवद्वर्णनं

राजप्रश्नवृत्ति

तावद्वाच्यं यावन्मणीनां स्पर्शः ॥ तस्य च बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्र सुमहदेकं उपकारिकालयनं उपकार्यं विमानाधिप
तिसत्कप्रासादावतंसकादीनामुपकारत्वादुपकारिका विमानाधिपतिसत्कप्रासादावतंसकादीनां पीठिकेत्यर्थः अन्यत्र त्वियमुपकार्योपका
र्यैकेति प्रसिद्धा ॥ उक्तं च शब्दप्रभेदनाम्नि शब्दशास्त्रे उपकार्योपकारिकेति । उपकारिकालयनमिव उपकारिकालयनं तच्च एकं योजनशतसहस्रमा
यामविष्कम्भाभ्यां त्रीणि योजनशतसहस्राणि षोडश सहस्राणि द्वे योजनशते सप्तविंशत्यधिके त्रयः क्रोशाः अष्टाविंशं धनुःशतं त्रयोदशाङ्गुलानि अर्द्धाङ्गु
लं च परिक्षेपतः इदं च परिक्षेपप्रमाणं जम्बूद्वीपपरिक्षेपपरिमाणवत् क्षेत्रसमासटीकातः परिभावनीयं पञ्च योजनशतानि बाहल्येन पिण्डेन सर्वजं
बूनदमयं इति सर्वात्मना जाम्बूनदमयमित्यादि विशेषणजातं प्राग्वत् । तच्च एकया पद्मवरवेदिकया एकेन च वनखण्डेन सर्वतः सर्वासु दि
क्षु समन्ततः सामस्त्येन सम्परिक्षिप्तं सा पद्मवरवेदिका इत्यादि सा पद्मवरवेदिका अर्द्धयोजनमूर्ध्वमुच्चैस्त्वेन पञ्च धनुःशतानि विष्क
म्भेण परिक्षेपेण उपकारिकालयनसमाना उपकारिकालयनप रिक्षेपपरिमाणा इत्यर्थः । नास्मिन्नित्यादि तस्याः पद्मवरवे
दिकायाः अयमेतद्रूपो वर्णावासो वर्णश्लाघा यथावस्थितस्वरूप कीर्त्तनं तस्या वा आसमन्ताद् वासो ग्रन्थपद्धतिरूपो वर्णावासो वर्णकनि
वेशः स्वार्थः प्रज्ञप्तः यथा शब्दतीर्थकरैस्तथाहत्यादिना नाम वर्णकोय ति इदं सूत्रं बहुषु पुस्तकेषु न दृश्यते केवलं क्वचिदेव दृष्टं ततो मा
न्मतिसम्मोहादिति विनेयजनानुग्रहाय पाठ उपदर्श्यते । वइरामया नेमा रिट्ठामया पइट्ठाणा वेरुलियमया खंभा सुवण्णरुप्पमया फलगा लोहिय
क्खमईओ सूईओ वइरामया संधी नानामणिमया कलेवरा नानामणिमया कलेवरसंघाडा नानामणिमया रूवा नानामणिमया रूवसंघाडा अंकामया
पक्खा अंकामया पक्खबाहाओ जोईरसामया वंसा वंसकवेल्लुयाओ रययामईओ पट्टियाओ जायरूवामई ओहाडणी वइरामई उवरिपुंछणी सव्वरयणा
मए अच्छायणे एतत्सर्वं ईरिव तूलावनीयेन वरकालवराणि मकुटशरीराणि कालवरसंघाटा मकुटशरीरसमूहा निरूपाणि रूपकाणि रूपसंघा
टा रूपसमूहा निमाणं उपमवरावेइया एगमेगेणं हेमजालेणं एगमेगेणं गवक्खजालेणं एगमेगेणं खिंखिणिजालेणं एगमेगेणं घंटाजालेणं एगमेगे ४५

*रैव॰

गेणं मुत्ताजालेणं एगमेगेणं कणगजालेणं एगमेगेणं मणिजालेणं एगमेगेणं रयणजालेणं एगमेगेणं सव्वरयणजालेणं एगमेगेणं पउमजालेणं स
व्वतो समंता संपरिक्खित्ता ते णं जाला तवणिज्जलंबूसगा सुवण्णपयरमंडिया नानामणिरयणविविहहारद्धहारउवसोभियसमुदया ईसिं अण्णमण्णम
संपत्ता पुव्वावरदाहिणउत्तरागएहिं वाएहिं मंदायं मंदायं एज्जमाणा एज्जमाणा पलंबमाणा पलंबमाणा पझंझमाणा पझंझमाणा उरालेणं मणुण्णेणं मणहरेणं कण्णमणणिव्वुइकरे
णं सद्देणं ते पएसे सव्वतो समंता आपूरेमाणा सिरीए अईव अईव उवसोभेमाणा चिट्ठंति ॥ तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं हयसंघाडा नर
संघाडा किन्नरसंघाडा किंपुरिससंघाडा महोरगसंघाडा गंधव्वसंघाडा उसभसंघाडा सव्वरयणामया अच्छा जाव पडिरूवा एवं पंतीओ वीहीओ मिहुणाई
तीसे णं पउमवरवेइयाए तत्थ तत्थ देसे तहिं तहिं बहुयाओ पउमलयाओ नागलयाओ असोगलयाओ चंपगलयाओ वणलयाओ वासंतियलयाओ अइमु
त्तगलयाओ कुंदलयाओ निच्चं कुसुमियाओ निच्चं मउलियाओ निच्चं लव इयाओ निच्चं थवइयाओ निच्चं गुलइयाओ निच्चं गोच्छियाओ निच्चं जमलियाओ निच्चं विणमिया
ओ निच्चं पणमियाओ निच्चं सुविभत्तपडिमंजरिवडंसगधरीओ निच्चं कुसुमियमउलियलवइयथवइयगुलइयगोच्छियजमलियविणमियपणमि
यसुविभत्तपडिमंजरिवडंसगधरीओ सव्वरयणामईओ अच्छाओ जाव पडिरूवाओ इति अस्य व्याख्या प्राग्वत् एवंस्वरूपाणं णमिति वाक्यालंकारे प
द्मवरवेदिका तत्र तत्र देशे एकैकेन कनकजालेन सर्वात्मना दा मसमूहेन लंबमानेन दामसमूहेन एकैकेन गवाक्षजालेन गवाक्षाकृति
रत्नविशेषदामसमूहेन एकैकेन किंकिणीजालेन किंकिणी क्षुद्रघंटिका एकैकेन घंटाजालेन किंकिण्यपेक्षया किंचिन्महत्यो घंटा घंटाः त
था एकैकेन मुक्ताजालेन मुक्ताफलमयेन दामसमूहेन एकैकेन मणिजालेन मणिमयेन दामसमूहेन एकैकेन कनकजालेन कनकं पीत
रूपं सुवर्णविशेषः तन्मयेन दामसमूहेन एवमेकैकेन रत्नजालेन एकैकेन पद्मजालेन सर्वरत्नमयपद्माकृतिदामसमूहेन सर्वतः सर्वासु दिक्षु स
मंततः सर्वासु विदिक्षु परिक्षिप्ता व्याप्ता एतानि च दामसमूहरूपाणि हेमजालादीनि जालानि तु वद्धमानानि विवक्षितानीत्याह ते णं जाला इत्यादि ता
नि हेमजालादीनि जालानि हिरण्याः आरूपतपनीयाः तपनीयलंबूसगाणीति वाक्यालंकारे हेमजालादीनि जालानि किंभूतानीत्याह तत्र ताः हेमजालादिरूपा

दृष्टाकारण२।

दामा इति तत्र णं बहवे हंसगा इत्यादि द्वयसंघाटादि सूत्रं लतासूत्रं च यावत् संघा इति पद्मवरवेदिकाशब्दप्रवृत्तिनिमित्तं जिज्ञासुः पृच्छति से केणट्ठेणं भंते
इत्यादि से शब्दोऽथशब्दार्थः अथ केनार्थेन केन कारणेन भदंत एवमुच्यते पद्मवरवेदिका पद्मवरवेदिका पद्मवरवेदिकेत्येवंरूपशब्दप्रव
त्तौ किं निमित्तमिति एवमुक्ते भगवानाह गौतम पद्मवरवेदिकायां तत्र तत्र एकदेशे वेदिकासु उपवेशनयोग्यमत्तवारणरूपासु वेदिका
वाहुषु वेदिकापार्श्वभित्तिष्विति यावत् इति द्वे वेदिके वेदिकापुटं तेषामंतराणि अपान्तरालानि वेदिकापुटान्तराणि तेषु पार्श्वमात्रतः स
स्तंभेषु स्तंभपार्श्वेषु स्तंभशीर्षेषु स्तंभपुटान्तरेषु इति द्वौ स्तंभौ स्तंभपुटं तेषामंतराणि स्तंभपुटान्तराणि तेषु सूचीषु फलकसंबंध
विघटनाभावहेतुपादुकास्थानीयासु तासामुपरि तिर्यक् प्रतिबद्धासु द्वाद्वसु इति यत्र प्रदेशे सूची फलकं भित्वा मध्ये प्रविशति तत्र सूची मध्योद्देश
सूचीमुखेषु तत्र सूचीफलकेषु सूचीभिः संबंधिनो यत्र फलकस्य ते शाखासु प्रत्येकप्रतराः सूचीफलकानि तेषु सूचीनामधउपरिवर्त्तमानेषु
पासूई इत्युत्तरसूत्रे इति संप्रदायः एतेषु प्रत्येकं पक्षा दावदिके कादश विशेषाः स्थानं बहूनि उत्पलानि गर्द्दभकानि प
द्मानि निश्चयेविकासीनि कुमुदानि चंद्रविकासीनि नलिनानि सुभगानि इक्षून् निपद्मानि सुगंधीनि पद्मविशेषरूपाणि सौगंधिकानि कह्ला
राणि पुंडरीकाणि सितांबुजानि तान्येव महांति महापुंडरीकाणि शतपत्राणि शतपत्रः कलितानि सहस्रपत्राणि पत्रसहस्रोपेतानि शतपत्रसहस्रप
त्रे च पद्मविशेषे पत्रसंख्याविशेषाद्भेदः सर्वरत्नमयानि अच्छानीत्यादि विशेषणजातं प्राग्वत् महया वासिकछत्तसमणाइ इति म
हान्ति प्रमाणानि वार्षिकाणि वर्षाकालं पायनात्रय स्थायीनि कृतानि वार्षिकाणि तानि च तानि छत्राणि च तत्समानानि प्रज्ञप्तानि हे श्रमण हे आयु
ष्मन् समणाउसो इत्यादि पदोत्तन अर्थेन अनेनार्थेन गौतम एवमुच्यते पद्मवरवेदिकेति तत्र तत्र यथोक्तरूपेषु प्रदेशेषु यथोक्तरूपाणि पद्मानि प
द्मवरवेदिकाशब्दप्रवृत्तिनिमित्तमिति भावः कस्मात् तेषु पद्मवरप्रधानावेदिका पद्मवरवेदिकेति पउमवरवेइयाणं भंते किं सासया इत्या
दि पद्मवरवेदिका भंते किं शाश्वती अशाश्वती अत्र ततः सूत्रे निर्देशः प्राकृतत्वात् किं नित्या उत अनित्येति भावः भगवानाह गौतमस्यात्

ॱसा॰१ॱ

३

४६

शाश्वती स्यादशाश्वती कथंचिन्नित्या कथंचिदनित्या इत्यर्थः स्याद्वाद्यो निपातः कथंचिदित्येतदर्थवाची सेकेणट्ठेणमित्यादि प्रश्नसूत्रं सुगमं भगवानाह
गौतम द्रव्यार्थतया द्रव्यास्तिकनयमतेन शाश्वती द्रव्यास्तिकनयो हि द्रव्यमेव तात्त्विकमभिमन्यते न पर्यायान् द्रव्यं चान्वयिपरिणामित्वात् अन्वयि चान्वयित्वात् सक
लकालभावीति नित्यं द्रव्यार्थतया शाश्वती वर्णपर्यायैः तदन्यसमुत्पद्यमानवर्णविशेषरूपैः गंधपर्यायैः रसपर्यायैः स्पर्शपर्यायैः उपलक्षणमेतत्
तदन्यपुद्गलविचटनोपचटनैश्च अशाश्वती किमुक्तं भवति पर्यायास्तिकनयमतेन पर्यायप्रधानविवक्षायामशाश्वती पर्यायाणां प्रतिक्षणं भावितया किय
त्कालभावितया विनाशित्वात् समणाउसो इत्यादि उपसंहारवाक्यं सुगमं इदं द्रव्यास्तिकनयवादी स्वमतं प्रतिष्ठापनार्थमेवमाह नात्यन्तमसत उत्पादो
नापि सतो विनाशः नासतो विद्यते भावो नाभावो विद्यते सतः इति वच नात्यन्तायोऽयं पर्यायतः इति वस्तु उत्पादविनाशौ न तदाविर्भावतिरोभावमात्रं य यामप्रतिप
त्तः उत्पन्नं विपन्नं वेत्यस्मात्सर्ववस्तु नित्यमिति एवं तन्मत चिंतायां स शायः किं घटादिवत् द्रव्यार्थतया शाश्वती उत सकलकालमेकरूपति
तं संशयापनोदार्थं भगवंतं पृच्छति पउमवरवेइयाणमित्या दि पद्मवरवेदिका भदंत कालतः कियच्चिरं कियंतं कालं या
वद्भवति एवंरूपा कियंतं कालमवतिष्ठत इति भगवानाह गौतम न कदाचिन्नासीत् सर्वदेवासीदिति भावः अनादित्वात् तथा न कदाचिन्न भवति
सर्वदैव वर्त्तमानकालचिंतायां भवतीति भावः सदैव भावात् तथा न कदाचिन्न भविष्यति किंतु न भविष्यति चिंतायां सर्वदैव भविष्यतीति प्रतिपत्तव्यं
अपर्यवसितत्वात् तदेवं कालत्रयचिंतायां नास्तित्वप्रतिषेधं विधाय संप्रत्यस्तित्वं प्रतिपादयति भुविं च इत्यादि अभूच्च भवति च भविष्यति चेति एवं त्रिका
लावस्थायित्वात् ध्रुवा मेर्वादिवत् ध्रुवत्वादेव सदैव स्वस्वरूपे नियता नियतत्वादेव शाश्वती शश्वद्भवनस्वभावा शाश्वतत्वादेव सततं गंगासिंधुप्रवा
हप्रवृत्तावपि पौंडरीकहृद इवानेकपुद्गलविचटनेऽपि तावन्मात्रान्यपुद्गलोच्चटनसंभवात् अक्षया न विद्यते क्षयो यथोक्तस्वरूपाकारपरिभ्रंशो यस्याः सा अ
क्षया अक्षयत्वादेवाव्यया मनागपि स्वरूपचलनस्य जातु विदप्यभावात् अव्ययत्वादेव स्वप्रमाणेऽवस्थिता मानुषोत्तराद्बहिःसमुद्र
इव तदेवं स्वप्रमाणे सदावस्थानेन चिंत्यमाना नित्या धर्मास्तिकायादिवत् सा गमित्यादि सा णमिति वाक्यालंकारे पद्मवरवेदिका एकेन वनखंडेन सर्वतः

४.कदा४॥

समंतात्परिक्षिप्ताः सपद्मवरवेदिको देशोने द्वे योजने विष्कंभत्वेन परिक्षेपतः उपकारिकालयनपरिक्षेपपरिमाणो वनखंडवर्णकः किण्हे किण्होभा
सइत्यादिरूपः समस्तोऽपि प्राग्वत् वक्तव्यो विहरंतीति तस्स णमित्यादि तस्य उपकारिकालयनस्य चउद्दिसिं इति चतसृषु दिक्षु एकैकस्यां दिशि एकैक
त्वात् चत्वारि त्रिसोपानप्रतिरूपकाणि प्रतिविशिष्टरूपकाणि त्रिसोपानानि प्रज्ञप्तानि त्रिसोपानवर्णको यानविमानवक्तव्यः तेषां च त्रिसोपान
प्रतिरूपकाणां पुरतः प्रत्येकमेकैकं तोरणं तोरणवर्णकोऽपि तथैव तस्स णमित्यादि तस्य उपकारिकालयनस्य बहुसमरमणिज्जे भूमिभागे इ
त्यादि नानाभूमिभागवर्णनं यानविमानवत्तावद्वक्तव्यं यावन्मणीनां स्पर्शः तस्य च बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्र म
हानेकः मूलप्रासादावतंसकः प्रज्ञप्तः स च पंचयोजनशतान्यूर्ध्वमुच्चैस्त्वेन अर्द्धतृतीयानि योजनशतानि विष्कंभतः अब्भुग्गयमूसियपहसिया
विवइत्यादि तस्य वर्णनं मध्ये भूमिभागवर्णनमुल्लोकवर्णनं द्वारवर्णनं च तस्य प्रासादावतंसकस्य बहुमध्यदेशभा
भागे अत्र महत्येका मणिपीठिका प्रज्ञप्ता अष्टौ योजनान्यायामविष्कंभाभ्यां चत्वारि योजनानि बाहल्यतः सर्वात्मना मणिमया
अच्छा श्लक्ष्णा इत्यादि विशेषणकदंबकं प्राग्वत् तीसे णमित्यादि तस्या मणिपीठिकाया उपरि महदेकं सिंहासनं प्रज्ञप्तं तस्य सिंहासनस्य व
र्णनं परिवारस्तानि शेषाणि भद्रासनानि प्राग्वत् से णमित्यादि स मूलप्रासादावतंसकः अन्यैश्चतुर्भिः प्रासादावतंसकैः तदर्द्धोच्चत्वप्र
माणैः मूलप्रासादावतंसकार्द्धोच्चत्वप्रमाणैः सर्वतः समंततः संपरिक्षिप्तः तदर्द्धोच्चत्वप्रमाणमेव दर्शयति अर्द्धतृतीयानि योजनशतान्यूर्ध्वमुच्चैस्त्वेन
पंचविंशत्यधिकं योजनशतं विष्कंभतः तेषामपि अब्भुग्गयमूसियपहसिया विवइत्यादि रूपवर्णनं मध्ये भूमिभागवर्णनमुल्लोकवर्णनं च प्राग्वत् तेषां च प्रासा
दावतंसकानां बहुमध्यदेशभागे प्रत्येकं सिंहासनं प्रज्ञप्तं तेषां च सिंहासनानां वर्णनं प्राग्वत् नवरमत्रापि शेषाणि परिवारभूतानि भद्रासनानि न वक्तव्यानि ते णं पासा
यवडेंसया इत्यादि ते प्रासादावतंसका अन्यैश्चतुर्भिः प्रासादावतंसकैः तदर्द्धोच्चत्वप्रमाणमात्रैरिति तेषां मूलप्रासादावतंसकानां यदर्द्धं तदुच्चत्वप्रमाण
मात्रैः मूलप्रासादावतंसकापेक्षया चतुर्भागमात्रप्रमाणैः सर्वतः समंतात्परिक्षिप्ताः तदर्द्धोच्चत्वप्रमाणमेव दर्शयति तेणमित्यादि ते प्रासादावतंसकाः पंच

×वक्र×६

×मूलप्रासादावतंसकापेक्षया ऽष्टभागप्रमाणमात्रैः सर्वतः समंतात्संपरिक्षिप्ताः तदर्द्धोच्चत्वप्रमाणमेव दर्शयति तेणमित्या
दि ते प्रासादावतंसकाः द्वाषष्टियोजनानि अर्द्धयोजनं चोर्ध्वमुच्चैस्त्वेन एकत्रिंशतं योजनानि क्रोशं च विष्कंभतः एतेषामपि
अब्भुग्गयमूसियपहसियइत्यादिस्वरूपवर्णनं मध्ये भूमिभागवर्णनमुल्लोकवर्णनं सिंहासनवर्णनं परिवारवर्जितं प्राग्वत्

विंशायोजनशतमर्द्धतृतीयांश्च योजनानि द्वाषष्टियोजनानि अर्द्धयोजनं च विष्कंभतः एतेषामपि अब्भुग्गयमूसियपहसियाविवइत्यादिस्वरूपवर्णनं मध्ये भूमिभाग
वर्णनमुल्लोकवर्णनं परिवाररहितं प्राग्वत् तेणमित्यादि ते च प्रासादावतंसका अन्यैश्चतुर्भिः प्रासादावतंसकैः तदर्द्धोच्चत्वप्रमाणैरनंतरोक्तप्रासादा
वतंसकार्द्धोच्चत्वप्रमाणैः मूलप्रासादावतंसकाप [illegible] क्षया षोडशभागप्रमाणैः सर्व
तात् संपरिक्षिप्ताः तदर्द्धोच्चत्वप्रमाणमेव दर्शयति एकत्रिंशतं योजनानि क्रोशं चोर्ध्वमुच्चैस्त्वेन पंचदश योजनानि अर्द्धतृतीयांश्च क्रोशान् विष्कंभ
तः एतेषामपि स्वरूपादिवर्णनमनंतरवत् एषामपि स्वरूपव्यावर्णनं भूमिभागवर्णनमुल्लोकवर्णनं सिंहासनवर्णनं च परिवारवर्जितं प्राग्वत् तस्स णं
मित्यादि तस्य मूलप्रासादावतंसकस्य उत्तरपुरच्छिमेणं ति उत्तरपूर्वस्यां दिशि ईशानकोण इत्यर्थः अत्र सभा सुधर्मा प्रज्ञप्ता सुधर्मा नाम विशिष्ट
छंदा का एता सा एकं योजनशतमायामतः पंचाशतं योजनानि विष्कंभतः द्वासप्ततिं योजनान्यूर्ध्वमुच्चैस्त्वेन सा चामाऽत्याह
अणेगखंभसयसन्निविट्ठा अनेकस्तंभशतसन्निविष्टा अब्भुग्गयसुकयवइरवेइयातोरणवररइयसालभंजियसुसिलिट्ठविसिट्ठलट्ठ
संठियपसत्थवेरुलियविमलखंभा इति अभ्युद्गता अतिरमणीयतयाऽदृष्टेणात्युच्छ्रिता सुकृता वज्रवेदिका तोरणवरसुकृतानि प्रा
णि शिल्पिरचितानि तोरणानि अभ्युद्गता अतिसुकृता च अभ्युद्गत सु कृता वज्रवेदिकाद्वारमुंडिकापरिवेदिका तोरणं च अभ्युद्गतसु
कृतवज्रवेदिकातोरणवराणि प्रधानानि रचितानि रतिदानि शालभंजिकाः सुश्लिष्टाः संबद्धा विशिष्टप्रधानलष्टमनोज्ञं संस्थितं संस्थानं येषां ते वि
शिष्टलष्टसंस्थिताः प्रशस्ताः शोभनाः वैडूर्यस्तंभा वैडूर्यरत्नमयाः स्तंभा यस्यां सा वररचितशालभंजिका सुश्लिष्टविशिष्टलष्टसंस्थितप्रशस्तवैडू
र्यस्तंभा ततः पूर्वपदेन कर्मधारयः समासः तथा नानामणिकनकरत्नानि खचितानि नियत्र सा नानामणिरत्नखचिता निर्मलात्मपरिनिपात सुस्वादिदर्शनात्
नानामणिकनकरत्नखचितोज्ज्वलानि निर्मलानि बहुसमो सुविभक्तः निचितो निविडो रमणीयश्च भूमिभागो यस्यां सा नानामणिकनकरत्न
खचितोज्ज्वलबहुसमसुविभक्तभूमिभागा ईहामृगउसभतुरगनरमगरविहगवालगकिन्नररुरुसरभचमरकुंजरवणलयपउमलयभत्तिचित्ता खंभु

×सिंहासनवर्णनं ×२
×केवलमत्रापि सिंहासने भद्रासने परिवारवर्जं ×
×तः समं

तप्ततेण मित्यादि ते प्रासादावतंसका अन्यैः श्चतुर्भिः प्रासादावतंसकैः तदर्द्धोच्चत्वप्रमाणैरनंतरोक्तप्रासादावतंसकार्द्धोच्चत्वप्रमाणैः ×क प.तं.२

×गंध्रिया×५

ग्यवरवेइयाभिगमा विद्याहरजमलजुगलजंतजुत्ताविव अच्चीसहस्समालिणीया रूवगसहस्सकलिया भिसिमाणा भिब्भिसमाणा चक्खुल्लोयणा
लेसा सुहफासा सस्सिरीयरूवा कंचणमणिरयणथूभियागा नाणाविहपंचवन्नघंटापडागपडिमंडियग्गसिहरा धवला मरीइकवयं विणिम्मुयंती ला
उल्लोइयमहिया गोसीससरसरत्तचंदणदद्दरदिन्नपंचंगुलितला उवचियवंदणकलसा वंदणघडसुकयतोरणपडिदुवारदेसभागा आस
त्तोसत्तविउलवट्टवग्घारियमल्लदामकलावा पंचवन्नसरससुरभिमुक्कपुप्फपुंजोवयारकलिया कालागुरुपवरकुंदुरुक्कतुरुक्कधूवडज्झंतमघमघंतगं
धुद्धुयाभिरामा सुगंधवरगंधगंधिया गंधवट्टिभूया अच्छरगणसंघविकिण्णा दिव्वतुडियसद्दसंपणादिया सव्वरयणामयी अच्छा जाव पडिरूवा इति शब्दः। तस्याः
णमित्यादि सभायाः सुधर्मायास्त्रिदिशि तिसृषु दिक्षु एकैकस्यां दिशि एकैकद्वारभावेन त्रीणि द्वाराणि प्रज्ञप्तानि तद्यथा एकं पूर्वस्या
मेकं दक्षिणस्यामेकमुत्तरस्याम्। तानि च द्वाराणि प्रत्येकं षोडश षोडश योजनान्यूर्द्ध्वमुच्चैस्त्वेनाष्टौ योजनानि विष्कम्भत
स्तावदेव प्रवेशेनाष्टौ योजनानीति भावः। सेया वरकणगथूभियाइत्यादि प्रागुक्तद्वारवर्णनं तावद्वक्त
व्यं यावद्वनमाला इति। तेषां द्वाराणां पुरतः प्रत्येकं मुखमंडपः प्रज्ञप्तास्ते च मुखमंडपाः प्रत्येकं योजनशतमायामतः पंचाशतं यो
जनानि विष्कम्भतः सातिरेकाणि षोडश योजनान्यूर्ध्वमुच्चैस्त्वेन एतेषामपि अणेगखंभसयसंनिविट्ठा इत्यादि वर्णनं सुधर्मसभावन्निरव
शेषं द्रष्टव्यं। तेषां च मुखमंडपानां पुरतः प्रत्येकं प्रत्येकं प्रेक्षागृहमंडपः प्रज्ञप्तः। ते च प्रेक्षागृहमंडपा आयामविष्कम्भाभ्यां [illegible] प्रेक्षागृहमं
डपानां च भूमिभागवर्णनं प्राग्वत्तावद्वाच्यं यावन्मणीनां स्पर्शः। तेषां च बहुसमरमणीयानां भूमिभागानां बहुमध्यदेशभागे प्रत्येकं वज्रमया अक्षपाट
काः प्रज्ञप्ताः। तेषां च वज्रमयानामक्षपाटकानां बहुमध्यदेशभागे प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः। ताश्च मणिपीठिका अष्ट योजनान्यायाम
विष्कम्भाभ्यां चत्वारि योजनानि बाहल्येन पिण्डभावेन सर्वात्मना मणिमय्यः अच्छा इत्यादि विशेषणजातं प्राग्वत्। तासां च मणिपीठिकानामुपरि प्रत्येकं
सिंहासनं प्रज्ञप्तं तेषां च सिंहासनानां वर्णनं परिवारश्च प्राग्वद्वक्तव्यः। तेषां च प्रेक्षागृहमंडपानामुपरि अष्टावष्टौ मंगलकानि ध्वजाः छत्रचामरध्वजा इत्या ४८

।टक ४१

दि प्राग्वत्। तेषां प्रेक्षागृहमंडपानां पुरतः प्रत्येकं प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः। ताश्च मणिपीठिकाः प्रत्येकं षोडश योजनान्यायामविष्कम्भाभ्यामष्टौ
योजनानि बाहल्येन सर्वात्मना मणिमय्यः अच्छा इत्यादि विशेषणकदम्बकं प्राग्वत्। तासां च मणिपीठिकानामुपरि प्रत्येकं चैत्यस्तूपः प्रज्ञप्तः। ते च
चैत्यस्तूपाः षोडश योजनान्यायामविष्कम्भाभ्यां सातिरेकाणि षोडश योजनान्यूर्ध्वमुच्चैस्त्वेन शंखांकेत्यादि तद्वर्णनं प्राग्वत्। तेषां च चैत्यस्तूपानामुपर्यष्टा यं×३
वष्टौ स्वस्तिकादीनि मंगलकानि तावद्वक्तव्यानि सहस्रपत्रहस्तका इति यावत्करणात् तेसिं चेइयथूभाणं उप्पिं बहवे कण्हचामरज्झया जाव सुक्किल्लचामरज्झया
अच्छा सण्हा रुप्पपट्टा वइरदंडा जलयामलगंधिया सुरूवा पासाईया जाव पडिरूवा। तेसिं चेइयथूभाणं उप्पिं बहवे छत्ताइछत्ता पडागाइपडागा घंटाजुगला उ
प्पलहत्थगा जाव सयसहस्सपत्तहत्थगा सव्वरयणामया अच्छा जाव पडिरूवा इति। एतच्च समस्तं प्राग्वत्। तेसि णमित्यादि तेषां चैत्यस्तूपानां प्रत्येकं
प्रत्येकं चतुर्दिशि चतसृषु दिक्षु एकैकस्यां दिशि एकैकमणिपीठिकाभावेन चतस्रो मणिपीठिकाः प्रज्ञप्ताः। अष्टौ
योजनान्यायामविष्कम्भाभ्यां चत्वारि योजनानि बाहल्येन सर्वात्मना मणिमय्यः अच्छा इत्यादि प्राग्वत्। तासां च मणिपीठिका
नामुपरि एकैकस्या अपि मणिपीठिकाया उपरि एकैकप्रतिमाभावेन चतस्रो जिनप्रतिमा जिनोत्सेधप्रमाणमात्रा जिनोत्सेध उ
त्कर्षतः पंचधनुःशतानि जघन्यतः सप्त हस्ताः इह तु पंचधनुःशतानि संभाव्यन्ते। पलियंकनिसन्नाउ इति पर्यंकासनसंनिषण्णाः स्तूपाभिमुख्यः संनि ×नि×६
क्षिप्ताः तिष्ठन्ति ताश्च तद्यथा ऋषभा वर्द्धमाना चंद्रानना वारिषेणा इति। तेसि णमित्यादि तेषां चैत्यस्तूपानां
पुरतः प्रत्येकं मणिपीठिकाः प्रज्ञप्ताः। ताश्च मणिपीठिकाः षोडश योजनान्यायामविष्कम्भाभ्यामष्टौ योजनानि बाहल्यतः सर्वमणिमय्य इत्यादि
प्राग्वत्। तासां च मणिपीठिकानामुपरि प्रत्येकं प्रत्येकं चैत्यवृक्षाः। ते चाष्टौ योजनान्यूर्द्ध्वमुच्चैस्त्वेन अर्द्धयोजनमुद्वेधेन द्वे योजने उच्चैस्त्वेन स्कंधः स चै३
एवार्द्धयोजनं विष्कम्भतः तथा बहुमध्यदेशभागे विडिमा ऊर्ध्वविनिर्गता शाखा सा सातिरेकाणि षड् योजनानि अष्टौ योजनानि विष्कम्भेन सर्वाग्रेण
सातिरेकाणि अष्टौ योजनानि प्रज्ञप्ताः। तेषां च चैत्यवृक्षाणामयमेतद्रूपो वर्णावासः प्रज्ञप्तस्तद्यथा वइरामयमूलरययसुपइट्ठियविडिमा वज्जाणि व

रायवृत्ति

ङ्कमयानि मूलानि येषां ते वज्रमयाः सुप्रतिष्ठिता विडिमा वज्रमध्यादशालागो ऊर्द्ध्वं विनिर्गताः शाखा येषां ते रजतसुप्रतिष्ठितविडिमास्ततः पूर्वपदेन
कर्मधारयः समासः ॥ रिष्टामयकंदा वेरुलियरुइलखंधा रिष्टामयो रिष्टरत्नमयः कंदो येषां ते रिष्टमयकंदाः तथा वैडूर्यरत्नमयो रुचिरः स्कंधो येषां ते तथा
ततः पूर्वपदेन कर्मधारयः ॥ सुजायवरजायरूवपढमगविसालसाला सुजातं मूलद्रव्यशुद्धं वरं प्रधानं ~ जातरूपं तदात्मकाः प्रथमकाः शाला मूलभूता विशा
लशालाः शाखा येषां ते सुजातवरजातरूपप्रथमकविशालशालाः ॥ नानामणिरयणविविहसाहप्पसाहवेरुलियपत्ततवणिज्जपत्तविंटइति नाना
मणिरत्नात्मिका विविधाः शाखाः प्रशाखा येषां ते तथा वैडूर्यमयानि पत्राणि येषां ते तथा तपनीयमयानि पत्रवृंतानि येषां ते तथा ततः पूर्वस्य प
दद्वयमीलनेन कर्मधारयः ॥ जांबूनद [illegible] जांबूनदसुमेवि. शषमया रक्तारक्तवर्णाः सुष्टदावामाना मृदवः सुकुमाराः सुकुमारस्पर्शाः प्र
वाला ईषदुन्मीलितपत्रभावाः पल्लवाः संजातपरिपूर्णप्रथमपत्र रूपा वरांकुराः प्रथमसमुद्भिद्यमाना अंकुरास्तान् धरंतीति तेषां ह
नदस्कष्टसुकुमारप्रवालपल्लववरांकुरधराः ॥ विचित्रमणिर यणसुरभिकुसुमफलभरनमियसालाइति विचित्रमणिरत्ने
यानियानि सुरभीनि कुसुमानि फलानि च तेषां भारेण नमिताः शालाः शाखा येषां ते तथा ॥ तथा सती शोभना छाया येषां ते सच्छा
याः ॥ सती शोभना प्रभा कांतिर्येषां ते सप्रभाः ॥ अत एव सश्रीकाः ॥ तथा सह उद्योतेन वर्त्तते मणिरत्नानामुद्योतस्तत्साधादुद्योताः ॥ अधिकं न
यनमनसोर्निर्वृतिकराः अमृतरससमरसानि फलानि येषां ते तथा पासाइयाइत्यादि विशेषणचतुष्टयं प्राग्वत् ॥ ते णं चेइयरुक्खा अन्नेहिं बहूहिं तिलिय
कलवकछत्रोपगशिरीषसप्तपर्णदधिपर्णलोद्धकधवचंदननीपकुटजकदंबपनसताल तमालप्रियालप्रियंगुपारापतराजवृक्षनंदिवृक्षैः सर्व
तः समंतात्संपरिक्षिप्ता इति वा तिलका यावन्नंदिवृक्षाः सुप्रतीताः ॥ कंदमंतः इत्यादि सर्वमशोकपादपवर्णनायामिव तावद्वक्तव्यं यावत्पडिरूवा
वर्णनं ॥ तेसिणं चेइयरुक्खाणं उप्पिं अट्ठट्ठमंगलकानि बहवः कृष्णचामरध्वजा इत्यादि चैत्यस्तूपवद्वक्तव्यं यावद्बहवः
सहस्रपत्रहस्तकाः सर्वरत्नमया यावत्प्रतिरूपका इति ॥ तेसिणं चेइयरुक्खाणं पुरओ पत्तेयं मणिपीढिका प्रज्ञप्ताः ता मणिपीठिका ४७

अष्टौ योजनान्यायामविष्कंभाभ्यां चत्वारि योजनानि बाहल्यतः सव्वरयणामईओ इत्यादि प्राग्वत् ॥ तासां मणिपीठिकानामुपरि प्रत्येकं माहेंद्रध्वजः प्र
ज्ञप्तः ॥ ते च माहेंद्रध्वजाः षष्टियोजनान्यूर्द्ध्वमुच्चत्वेन अर्द्धक्रोशमुद्वेधेन उद्वेधेन अर्द्धक्रोशं विष्कंभतः वइरामयवट्टलट्ठसंठियसुसलिट्ठ
परिघट्ठमट्ठसुपइट्ठिया इति वज्रमया वज्ररत्नमया तथा वृत्तं वर्त्तुलं लष्टं मनोज्ञं संस्थितं संस्थानं येषां ते वृत्तलष्टसंस्थिताः तथा सुश्लिष्टा यथा भवंति
एवं परिघृष्टा इव खरशानया पाषाणप्रतिमावत् सुश्लिष्टपरिघृष्टाः मृष्टाः सुकुमारशानया पाषाणप्रतिमावन्मृष्टाः सुप्रतिष्ठिता मनागपि चलनाभावात् ततो
विशेषणसमासः ॥ अणेगवरपंचवन्नकुडभीसहस्सपरिमंडियाभिरामा वाउद्धयविजयवेजयंती पडागाछत्ताइछत्तकलिया तुंगा गगणतलम
भिलंघमाणसिहरा पासाइया जाव पडिरूवा इति प्राग्वत् ॥ तेसिणमि त्यादि तेषां माहेंद्रध्वजानामुपरि अष्टावष्टौ मंगलकानि बहवः कृष्णचा
मरध्वजा इत्यादि तोरणवत् सर्वं वक्तव्यं तेषां च माहेंद्रध्वजानां पुरु तः प्रत्येकं प्रत्येकं नंदा नंदाभिधाना पुष्करिण्यः प्रज्ञप्ताः एकं योज
नशतमायामतः पंचाशतं योजनानि विष्कंभतः द. मे [illegible] त्याउ नान्युद्वेधेन उंड विनता तासां च नंदापुष्करिणीनां अच्छा सण्हाउ
रययामयकूलाउ इत्यादि वर्णनं प्राग्वत् ॥ तासां नंदापुष्करिणीनां प्रत्ये कं प्रत्येकं पद्मवरवेदिकया प्रत्येकं प्रत्येकं वनखंडेन परिक्षिप्ताः
तासां नंदापुष्करिणीनां प्रत्येकं त्रिदिशि त्रिसोपानप्रतिरूपकाणि तोर णवर्णनं प्राग्वत् सभाए णं सुहम्माए इत्यादि सभायां सुधर्मायां अष्टा
चत्वारिंशन्मानोगुलिकासहस्राणि पीठिकासहस्राणि प्रज्ञप्तानि तद्यथा पूर्वस्यां दिशि षोडश मानोगुलिकासहस्राणि षोडश सहस्राणि पश्चि
मायामष्टौ सहस्राणि दक्षिणतोऽष्टौ सहस्राणि उत्तरतः फलकनागदंतकमाल्यदामवर्णनं प्राग्वत् ॥ सभाए णं सुहम्माए इत्यादि सभायां सुधर्मायां
यामष्टचत्वारिंशद्गोमानसिकाः शय्यारूपस्थानविशेषाः सहस्राणि प्रज्ञप्तानि तद्यथा षोडश सहस्राणि पूर्वेण षोडश सहस्राणि पश्चिमायामष्टौ
सहस्राणि दक्षिणतोऽष्टौ सहस्राणि उत्तरतः तास्वपि फलकवर्णनं नागदंतवर्णनं सिक्कगवर्णनं धूपघटिकावर्णनं च द्वारवत् ॥ सभाए णं सुहम्माए इ
त्यादिना भूमिभागवर्णनं सभाए णं सुहम्माए इत्यादिना उल्लोकवर्णनं प्राग्वत् ॥ तस्मणमित्यादि तस्य बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदे

शालायाः अत्र महती एका मणिपीठिका प्रज्ञप्ता षोडश योजनान्यायामविष्कंभाभ्यां अष्टौ योजनानि बाहल्यतः सर्वरत्नमयी इत्यादि प्राग्वत् तस्याश्च मणि-
पीठिकाया उपरि महानेको माणवकनामा चैत्यस्तंभः प्रज्ञप्तः षष्टिं योजनान्यूर्द्ध्वमुच्चैस्त्वेन योजनमुद्वेधेन योजनं विष्कंभेन अष्टचत्वारिंशदश्रिकः
अडयालीसइकोडीए अडयालीसइविग्गहिए इत्यादि संप्रदायगम्यं वइरामयवट्टलट्ठसंठिए इत्यादि आ ध्वजवर्णनं निरवशेषं तावद्वक्तव्यं
खंभमहस्स पन्नरसगाम वरयणामया जाव पडिरूवा इति तस्य च माणवकस्य चैत्यस्तंभस्य उपरि द्वादश योजनान्यवगाह्य उपरितनानाम्
द्वादशयोजनानि वर्जयित्वा अधस्तादपि द्वादशयोजनानि वर्जयित्वा मध्ये षट्त्रिंशति योजनेषु बहवः सुवर्णरूप्यमयाः फलका इत्या-
दि फलकवर्णनं नागदन्तवर्णनं सिक्ककवर्णनं च प्राग्वत् तेषु च वज्रमयेषु सिक्ककेषु बहवो वज्रमया गोलवृत्ताः समुद्गकाः
प्रज्ञप्ताः तेषु च वज्रमयेषु समुद्गकेषु बहूनि जिनसक्थीनि सन्निक्षिप्तानि तिष्ठन्ति यानि सूर्याभस्य देवस्य अन्येषां च बहूनां वैमानि-
कानां देवानां देवीनां च अर्चनीयानि चन्दनादिना वन्दनीयानि स्तुत्या पूजनीयानि पुष्पादिना माननीयानि बहुमानतः सत्का-
रणीयानि वस्त्रादिना कल्याणं मंगलं दैवतं चैत्यमिति बुद्ध्या पर्युपासनीयानि तस्स णं चेइयखंभस्स उवरिं अट्ठट्ठमंगलगा
इत्यादि प्राग्वत् तस्य माणवकस्य चैत्यस्तंभस्य पूर्वस्यां दिशि अत्र महत्येका मणिपीठिका प्रज्ञप्ता अष्टौ योजनान्यायामविष्कंभाभ्यां च-
त्वारि योजनानि बाहल्येन सर्वमणिमयी इत्यादि प्राग्वत् तस्याश्च मणिपीठिकाया उपरि अत्र महदेकं देवशयनीयं प्रज्ञप्तं तस्य च देवशयनीयस्य
अयमेतद्रूपो वर्णावासः वर्णकनिवेशः प्रज्ञप्तः नानामणिमयाः प्रतिपादाः प्रतिपादा नाम मूलपादानां प्रतिविशिष्टोपष्टंभकरणाय पादाः सौवर्णिकाः
सुवर्णमयाः पादाः मूलपादाः नानामणिमयानि पादशीर्षकाणि जाम्बूनदमयानि गात्राणि ईषादीनि वज्रमया वज्ररत्नापूरिताः सन्धयः नानामणिम- ५०
यं वेच्चे इति नानामणिमयं व्यूतं विशिष्टवानं रजतमयी तूली लोहिताक्षमयानि बिब्बोयणाणि इति उपधानकानि अंगवालिंगमसूरकोदाकारः बि-
ब्बोयणा उपधानकान्यभ्यन्तरे इति तपनीयमय्यो गंडोपधानिकाः सणदक्खमयणिच्छ इत्यादि तद्देवशयनीयं सालिंगनवर्तिकं महदालिंगनव-

३१

र्यशरीरप्रमाणेनोपधानेन यत्तत्तथा उन्नते बिब्बोयणे इति उन्नयते उभयोः शिरोऽन्तपादान्तयोः स्थिते बिब्बोयणे उपधाने यत्र तत् उन्नयतो बिब्बोयणं दुहतो उ-
न्नते इति उन्नयते उक्तं मध्ये णयगंभीरे मध्ये नतं निम्नत्वात् गंभीरं च महत्त्वात् गंगापुलिनवालुकायाः अवदालो विदलनं पादादिन्यासे अधोग-
मनमिति तावत्स्वनसालिसए इति महद्गंगापुलिनवालुकावदालसदृशकं हस्तपातिताचयंप्र कारादि सल्यादिपिहितं उवचियइदियइति विशिष्टपरि-
कर्मितं क्षौमं कार्पासिकं दुकूलं वस्त्रं तादृक् पट्टः उपरियोद्भोम दुकूलपट्टः स प्रतिच्छादनं यस्य तत्तथा आईणगरूयबूरनवणीयतूलफा-
स इति प्राग्वत् रत्तंसुयसंवुए इति रक्ताशुकेन संवृतं अत एव सुरम्ये पासाईए इत्यादि प्राग्वत् तस्स णमित्यादि तस्य देवशयनीयस्य उत्तर-
पूर्वस्यां दिशि अत्र महत्येका मणिपीठिका प्रज्ञप्ता सा च अष्टौ योजनान्यायामविष्कंभाभ्यां चत्वारि योजनानि बाहल्यतः सर्वमणिमयी इत्यादि प्रा-
ग्वत् तस्याश्च मणिपीठिकाया उपरि क्षुल्लको महेन्द्रध्वजः प्रज्ञप्तः तस्य प्रमाणं वर्णकश्च महेन्द्रध्वजवद्वक्तव्यं तस्स णमित्यादि तस्य क्षुल्लक-
महेन्द्रध्वजस्य पश्चिमायां अत्र सूर्याभस्य देवस्य महानेकः चोप्पालो नाम प्रहरणकोशः प्रहरणस्थानं प्रज्ञप्तं किंविशिष्ट इत्याह सव्व-
वइरामए अच्छे जाव पडिरूवे इति प्राग्वत् तत्थ णमित्यादि तत्र चोप्पालके प्रहरणकोशे बहूनि परिघरत्नखड्गगदाधनुःप्रमुखादीनि ५
प्रहरणरत्नानि सन्निक्षिप्तानि तिष्ठन्ति किंभूतानीत्यत आह उज्ज्वलानि शितानि अतितेजितानि अत एव तीक्ष्णधाराणि प्रासादीयानीत्यादि प्राग्व-
त् तस्याश्च सभायाः सुधर्मायाः उपरि बहून्यष्टाष्टमंगलकानीत्यादि सर्वं प्राग्वद्वक्तव्यं सभाए णमित्यादि सभायाः सुधर्मायाः उत्तरपुरत्थिमे ण-
मिति उत्तरपूर्वस्यां दिशि महदेकं सिद्धायतनं प्रज्ञप्तं एकं योजनशतं आयामतः पंचाशतं विष्कंभतः द्वासप्ततिं योजनान्यूर्ध्वमुच्चैस्त्वेनेत्यादि सर्वं सुध-
र्मावद्वक्तव्यं यावद्गोमानसीवक्तव्यता तथा चाह सभागमएणं जाव गोमाणसियाउ इति किमुक्तं भवति यथा सुधर्मायां सभायां पूर्वदक्षिणोत्तर-
वर्तीनि त्रीणि द्वाराणि तेषां च द्वाराणां पुरतो मुखमण्डपाः तेषां मुखमण्डपानां पुरतः प्रेक्षागृहमण्डपाः प्रेक्षागृहमण्डपानां पुरतश्चैत्यस्तूपाः प्रतिमास्ते-
षां च चैत्यस्तूपानां पुरतश्चैत्यवृक्षाः तेषां च चैत्यवृक्षाणां पुरतो महेन्द्रध्वजास्तेषामपि पुरतो नन्दापुष्करिण्यस्तदनन्तरं गुलिकागोमानस्यश्चोक्तास्तथा

सिद्धायतनस्य
नि महामा वाशा
स्थतीनाश्रईस्थात
मानाः आयतनं
नत्यानीभरता
नदी स्थानिका
३॥ ७

राजप्रश्नि

त×१

णि सर्वमनेनैव क्रमेण निरवशेषं वक्तव्यं उल्लोकवर्णनं भूमिभागवर्णनं च प्राग्वत् तस्सणमित्यादि तस्य सिद्धायतनस्य बहुमध्यदेशभागे अत्र
महत्येका मणिपीठिका प्रज्ञप्ता सा च षोडश योजनान्यायामविष्कंभाभ्यामष्टौ योजनानि बाहल्यतः सर्वमणिमयीत्यादि प्राग्वत् तासणमित्यादि
तस्याश्च मणिपीठिकाया उपरि अत्र महदेकं देवच्छंदकः प्रज्ञप्तः स च षोडश योजनान्यायामविष्कंभाभ्यां सातिरेकाणि षोडश योजनान्यूर्द्ध
मुच्चैस्त्वेन सर्वरत्नमय इत्यादि प्राग्वत् तत्र च देवछंदके अष्टशतमष्टाधिकं शतं जिनप्रतिमानां जिनोत्सेधप्रमाणमात्राणां पंचधनुःशतप्रमाणा
नामिति भावः संनिक्षिप्तं तिष्ठति तासिणं जिणपडिमाणमित्यादि तासां जिनप्रतिमानामयमेतद्रूपो वर्णावासो वर्णकनिवेशः प्रज्ञप्तः तपनीयम
यानि हस्ततलपादतलानि अंकरत्नमया अंतर्लोहिताक्षरत्नप्रतिसेक नखाः कनकमय्यो जंघाः कनकमयानि जानूनि कनकमया ऊरव
ः कनकमय्यो गात्रयष्टयः तपनीयमया नाभयः रिष्टमय्यो रोमराजय ः तपनीयमयाश्चुचुकाः तपनीयमयाः श्रीवत्साः शि
लाप्रवालमया ओष्ठाः स्फटिकमया दंताः तपनीयमय्यो जिह्वाः तपनीयमयानि तालुकानि कनकमय्यो नासिकाः अं
तर्लोहिताक्षप्रतिसेकाः अंकमयान्यक्षीणि अंतर्लोहिताक्षप्रतिसे कानि रिष्टमयानि अक्षिपत्राणि रिष्टरत्नमय्यो भ्रुवः कनकमयाः
कपोलाः कनकमयाः श्रवणाः कनकमय्यो ललाटपट्टिकाः वज्रम य्यः शीर्षघटिकाः तपनीयमय्यः केशांतकेशभूमयः केशांतभूमयः
श्चतिलावः रिष्टमया उपरिमूर्द्धजाः केशाः तासां जिनप्रतिमानां पृष्ठत एकैका छत्रधराप्रतिमा हिमरजतकुंदेंदुप्रकाशं सकोरंटमाल्यदामधवलमा
तपत्रं गृहीत्वा सलीलं धरंती तिष्ठति तासां जिनप्रतिमानां प्रत्येकमुभयोः पार्श्वयोः द्वे द्वे चामरधारप्रतिमे प्रज्ञप्ते ताः चंदप्पहवइरवेरुलियनानामणिर
यणखचितदंडाउ इति चंद्रप्रभश्चंद्रकांतो वज्रं वैडूर्यं च प्रतीतं चंद्रप्रभवज्रवैडूर्याणि शेषाणि च नानामणिरत्नानि खचितानि येषु दंडेषु ते तथा एवंरूपा
श्चित्रनानाकारा दंडा येषां तानि तथा सा चामरशब्दं विशेषणत्वात् पूर्वं निपातः सूक्ष्मरजतदीर्घवालाउ इति सूक्ष्मा रजतमया दीर्घा वाला येषां तानि तथा संखंककुंददग
रयअमयमहियफेणपुंजसन्निकासाउ धवलाउ इति प्रतीतं चामराणि गृहीत्वा सलीलं वीजयंत्यस्तिष्ठंति ताश्च सव्वरयणामईउ अच्छा इत्यादि प्राग्व

×प्रतिमानां×४

५१

त् तासिणमित्यादि तासां जिनप्रतिमानां पुरतो द्वे द्वे नागप्रतिमे द्वे द्वे यक्षप्रतिमे द्वे द्वे भूतप्रतिमे द्वे द्वे कुंडधारप्रतिमे संनिक्षिप्ते तिष्ठतः तस्मिंश्च देव
च्छंदके तासां जिनप्रतिमानां पुरतो अष्टशतं घंटानामष्टशतं चंदनकलशानामष्टशतं भृंगाराणामष्टशतमादर्शानामष्टशतं स्थालानामष्टशतं पात्रीणामष्ट
शतं सुप्रतिष्ठानामष्टशतं मनोगुलिकानां पीठिकाविशेषाणामष्टशतं वातकरकाणामष्टशतं चित्राणां रत्नकरंडकानामष्टशतं हयकंठानामष्टश
तं गजकंठानामष्टशतं नरकंठानामष्टशतं किन्नरकंठानामष्टशतं किंपुरुषकंठानामष्टशतं महोरगकंठानामष्टशतं वृषभकंठानामष्टशतं पुष्पचंगे
रीणामष्टशतं माल्यचंगेरीणां मुकुलानि ग्रथितानि माल्यानि अष्टशतं चूर्णचंगेरीणामष्टशतं गंधचंगेरीणामष्टशतं वस्त्रचंगेरीणामष्टशत
माभरणचंगेरीणामष्टशतं सिद्धार्थकचंगेरीणामष्टशतं लोमहस्तकचं गेरीणां लोमहस्तकं च मयूरपिच्छपुंजनिका अष्टशतं पुष्पपटलका
नामेवं माल्यचूर्णगंधवस्त्राभरणसिद्धार्थकलोमहस्तकपटलकानाम पि प्रत्येकं प्रत्येकं अष्टशतं वक्तव्यं अष्टशतं सिंहासनानामष्टश
तं छत्राणामष्टशतं चामराणामष्टशतं तैलसमुद्गकानामष्टशतं को ष्ठसमुद्गकानामष्टशतं पत्रसमुद्गकानामष्टशतं चोयकस
मुद्गकानामष्टशतं तगरसमुद्गकानामष्टशतमेलासमुद्गकानामष्टशतं हरिता लसमुद्ग कानामष्टशतं हिंगुलकसमुद्गकानामष्टशतं मनःशि
लासमुद्गकानामष्टशतमंजनसमुद्गकानां सर्वाण्यपि अमूनि तैलादीनि पर मसुरभिगंधोपेतानि अष्टशतं ध्वजानामत्र संग्रहणिगाथा चंदणक
लसा भिंगारगा य आयंसया य थाला य पाती सुपइट्ठा मणगुलिका वायकरगा य चित्तारयणकरंडा हयगयनरकंठगा य चंगेरी पडलगसीहासण
छत्तचामरा समुग्गय झया य अष्टशतं धूपकडुच्छकानां संनिक्षिप्तं तिष्ठति तस्य च सिद्धायतनस्य उपरि अष्टाष्टमंगलकानि ध्वजाः छत्रातिछत्राणि
च प्राग्वत् तस्य च सिद्धायतनस्य उत्तरपूर्वस्यां दिशि अत्र महत्येका उपपातसभा प्रज्ञप्ता तस्याश्च सुधर्माया इव स्वरूपवर्णनं द्वारत्रयवर्णनं मुखमं
डपप्रेक्षागृहमंडपादिवर्णनादि प्रकारस्तावत् वक्तव्यो यावदुल्लोकवर्णनं तस्याश्च बहुसमरमणीयस्य भूमिभागस्य बहुमध्यदेशभागे अत्र
महत्येका मणिपीठिका प्रज्ञप्ता सा च अष्टौ योजनान्यायामविष्कंभाभ्यां चत्वारि योजनानि बाहल्येन सर्वमणिमयीत्यादि प्राग्वत् तस्याश्च मणिपीठि

राजप्र ५१

राजप्रश्नी

कायाउपरिअत्रमहदेकंदेवशयनीयंप्रज्ञप्तंतस्यचस्वरूपंयथासुधर्मायांसभायांदेवशयनीयस्यतस्याउपपातसभायाउपरिअष्टाष्टमंगलका
दीनिप्राग्वत्।तासणमित्यादितस्याउपपातसभायाउत्तरपूर्वस्यांदिशिमहानेकोह्रदःप्रज्ञप्तः।सचएकंयोजनशतमायामतःपंचाशद्योजनानिविष्कं
भतोदशयोजनान्युद्वेधेनअच्छःश्लक्ष्णइत्यादितदाह्रदवर्णनंनिरवशेषंवक्तव्यं।सेणमित्यादिसह्रदएकयापद्म
वरवेदिकयाएकेनचवनखंडेनसर्वतःसमंतात्संपरिक्षिप्तः।पद्मवरवेदिकावर्णनंवनखंडवर्णनंचप्राग्वत्।तस्यह्रदस्यत्रिदिशित्रिसोपानप्रति.
सोपानप्रतिरूपकाणिप्रज्ञप्तानि।तेषांचत्रिसोपानप्रतिरूपकाणांतोरणानांचवर्णनंप्राग्वत्।तस्यचह्रदस्योत्तरपूर्वस्यांदिशिअत्रमहत्येकाअभिषे
कसभाप्रज्ञप्ता।साचसुधर्मसभावत्प्रमाणस्वरूपद्वारत्रयमुखमंडपादिवर्णनप्रकारेणतावद्वक्तव्यायावद्गोमानसीवक्तव्यतावदनंतरंतावदुल्लो
कवर्णनंभूमिभागवर्णनंचतावद्यावन्मणीनांस्पर्शः।तस्याअभिषेकसभायाबहुसमरमणीयस्यभूमिभागस्यबहुमध्यदेशभाग
महत्येकामणिपीठिकाप्रज्ञप्ता।साचअष्टौयोजनान्यायामविष्कंभाभ्यांचत्वारियोजनानिबाहल्येन।सर्वरत्नमयीत्या
दिप्राग्वत्।तस्यामणिपीठिकायाउपरिअत्रमहदेकंसिंहासनंसिंहासनवर्णकंप्राग्वत्नवरमपरिवारभूतानिभद्रासनानिनवक्त
व्यानि।तस्मिंश्चसिंहासनेसूर्याभस्यदेवस्यसुबहुअभिषेकभांडंअभिषेकयोग्यउपस्करःसंनिक्षिप्तःतिष्ठति।तस्यांअभिषेकसभा
याउपरिअष्टाष्टमंगलकादीत्यादिप्राग्वत्।तस्याश्चअभिषेकसभायाउत्तरपूर्वस्यांदिशिअत्रमहत्येकाअलंकारसभाप्रज्ञप्ता।साचाभिषेकसभावत्प्रमा
णस्वरूपद्वारत्रयमुखमंडपप्रेक्षागृहमंडपादिवर्णनप्रकारेणतावद्वक्तव्यायावत्सपरिवारंसिंहासनंतत्रसूर्याभस्यदेवस्यअलंकारिकमलंका
रभांडंसंनिक्षिप्तम्।शेषंप्राग्वत्।तस्याश्चालंकारसभायाउत्तरपूर्वस्यांदिशिअत्रमहत्येकाव्यवसायसभाप्रज्ञप्ता।साचाभिषेकसभा
वत्प्रमाणस्वरूपद्वारत्रयमुखमंडपादिवर्णनप्रकारेणतावद्वक्तव्यायावत्सिंहासनंसपरिवारंतत्रमहदेकंपुस्तकरत्नंसंनिक्षिप्तंतस्यचपु ५२
स्तकरत्नस्यायमेतद्रूपोवर्णावासोवर्णकनिवेशःप्रज्ञप्तः।रिष्टमय्यौरिष्टरत्नमय्योकंबिकेपृष्ठकेइतिभावः।रत्नमयोदवरकोयत्रपत्राणिप्रोता

मपी २

निसंतिनानामणिमयोग्रंथिर्दवरकस्यादौयेनपत्राणिननिर्यंतिअंकमयानिअंकरत्नमयानिपत्राणिनानामणिमयंलिप्यासनंमषीभाजनमि
त्यर्थः।तपनीयमयीशृंखलाजनसत्कारिष्टरत्नमयंरिष्टरत्नमयंछदनंरिष्टमयीरिष्टरत्नमयीमषीवज्रमयीलेखनी।रिष्टमया
न्यक्षराणिधार्मिकंलेख्यंक्वचिद्धम्मिएसत्थेइतिपाठः।तत्रधार्मिकंशास्त्रमितिव्याख्येयं।तस्याश्चउपपातसभायाउत्तरपूर्वस्यांदिशिमहदेकं
बलिपीठंप्रज्ञप्तंतच्चाष्टौयोजनान्यायामविष्कंभाभ्यांचत्वारियोजनानिबाहल्येन।सर्वरत्नमयमच्छमित्यादिप्राग्वत्।तस्यचबलिपीठस्योत्तरपूर्व
स्यांदिशिअत्रमहत्येकानंदापुष्करिणीप्रज्ञप्ता।साचह्रदप्रमाणा।ह्रदस्यैवतस्याअपित्रिसोपानवर्णनंतोरणवर्णनंचप्राग्वत्।तावद्वक्तव्यंयावद्वा
रूपंचसूर्याभस्यदेवस्यविमानंतत्रतावद्बहुरूपादाववर्णितंसप्रतिसूर्याभोदेवउत्पन्नःसन्यदकार्षीत्तद्यथातस्याभिषेकोऽलंकारश्चउपदर्श्य
ते।तेणंकालेणंतेणंसमएणमित्यादितस्मिन्कालेतस्मिन्समयेसूर्याभोदेवःसूर्याभविमानेउपपातसभायांदेवशयनीये
देवदूष्यांतरेप्रथममंगुलासंख्येयभागमात्रयाअवगाहनयासद्यउत्पन्नः।तएणमित्यादिअधुनोत्पन्नमात्रःसन्पंचविधयापर्याप्त्या
समाप्तिकालांतरस्याप्यत्यल्पत्वात्भाषामनःपर्याप्त्योःकथंचिदेकत्वविवक्षणमितिपंचविधयेत्युक्तंअन्यथाषड्
त्पन्नःतएणमित्यादिततस्तस्यसूर्याभस्यदेवस्यपंचविधयापर्याप्त्यापर्याप्तिभावमुपगतस्यसतःअयमेतद्रूपःसंकल्पःसमुदपद्यत।अत्र
किमित्यादियद्व्याख्यानंपूर्ववत्।किंमेपूर्वंकरणीयंकिंमेपश्चात्करणीयंकिंमेपूर्वंकर्तुंश्रेयःकिंमेपश्चात्कर्तुंश्रेयःतथाकिंमेपूर्वमपि
